न·को· श्रीमतेग … पाप्टविभागेम
१ त्स्यादि … ादंमुनिंनत्वा
॥ कणादं … त्रोमिपमा
पदार्थी … म दुखाति
पृथिव्य … रूपरसां
धस्पर्श … स्वक्त्वप्रवे बुद्धि
त्वाले ह … वात्वले ह
संस्कार … प्रणाकं
॥ चनप्रस … व्याणामौ
नंत्यानि … भावोद्विवि रामः
पः संस … वहुद्रव्यस

त.कौ. श्रीमते रामानुजाय नमः श्रीवासुदेवं नवनीरदाभं स्माधराले कृतपाद्मविभागं म
१ त्स्यादिरूपैः कृतलोकतोषं विद्यानिदानं परमं नमामि १ आदित्यपादं गुरुं निनत्वा
ग कणादसूत्रं ततः परं च लौगाक्षिभास्करस्तनुते तर्ककौमुदीं २ तत्रोक्ति सप्त
पदार्थाः ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः तत्र द्रव्याणि
पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव गुणास्तु रूपरसगं
धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वे बुद्धि
सुखदुःखेच्छाद्वेषप्रयत्न ... गुरुत्वद्रवत्वस्नेह
संस्कारधर्माधर्मशब्दाश्च चतुर्विंशतिरेव कर्माण्युत्क्षेपणापक्षेपणाकुं
ग चनप्रसारणगमनानि पंच सामान्यं द्विविधं परमपरं चेति नित्यद्रव्यवृत्तयो
ऽन्त्या विशेषास्त्वनन्ता एव समवायस्त्वेक एवं अभावो द्विवि
धः संसर्गाभावोऽन्योन्याभावश्चेति द्रव्यत्वसामान्यवत् गुणवद्वा द्रव्यम्

- Title – तर्ककौमुदी
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 25/50
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning – श्रीमते रामानुजाय नमः श्रीवासुदेवं नवनीरदाभं स्माधराले कृतपाद्मविभागं मत्स्यादिरूपैः कृतलोकतोषं
- End – समानकालीनगुः ... संसारकालीनगुः
- Colophon-
- Illustrations -
- Source -
- Subject - न्याय दर्शन
- Revisor -
- Author - लौगाक्षि भास्कर
- Remarks- तर्ककौमुदी, सम्पूर्ण

त. कौ. श्रीमते रामानुजाय नमः श्रीवासुदेवं नवनीरदाभं रमाधरालंकृतपार्श्वभागं म
१ त्स्यादिरूपैः कृतलोकतोषं विधानिदानं परमं नमामि १ अहृदि ध्यात्वा मुनिं नत्वा
कणादं च ततः परम् लौगाक्षिभास्करेणेयं तन्यते तर्ककौमुदी २ तत्र सप्त
पदार्थाः ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त द्रव्याणि
पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव गुणास्तु रूपरसगं
धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसुखदुःखे बुद्धि
त्वच्छेह शब्द बुद्धिसुखदुःखेच्छाद्वेषप्रयत्न धर्म गुरुत्वद्रवत्वस्नेह
संस्कारधर्माधर्मशब्दाश्चतुर्विंशतिरेव कर्माण्युत्क्षेपणापक्षेपणाकुं
चनप्रसारणगमनानि पंच सामान्यं द्विविधं परमपरं च नित्यद्रव्यवृत्तयो
नन्त्यास्तु वृत्तयो विशेषास्त्वनंता एव समवायस्त्वेक एव अभावो द्विवि
धः संसर्गाभावोऽन्योन्याभावश्चेति द्रव्यत्वसामान्यवत्त्वं गुणवत्त्वं वा द्रव्यत्वम्

नापत्वदं प्रिनवेधावनता
यल्लगतत्कांतिलेशकलि
काजलधिं प्रविष्टा ता एवत
स्पमघनेनघनीमवं त्वेन
नं समुद्रनवनीतपदं प्रपन्नाः
कदाचं दारण्ये विपुलयमुना
तीरपुलिने वसंतं गोविंदं हलधरसु
दामादिसहितम् अपे कृष्ण त्वा
मिनमधुमुरलीमोहन विभो प्रसी
देतिक्रोशन्निमिषमिव नेष्या
मि दिवसान् यावन्नेत्र सम
नकांति सलिले मग्नं तदिंदीव
रंमे द्वेरंतरीतः प्रियेतव मुखाप
त्रकामिशाषी यपित्वम्मना
नुष्मारिगतपलिराजहंसागना
त्वरसाद्धपविनोदमात्रमपि
मेदैवेन न लभ्यते यदमहं
ज्ञानामी त्वत्र समवायसंबं
धावच्छिन्न घटत्वनिष्ठप्रता
नि रूपित विशेष्यता भिन्नवि
षयितासंबंधावच्छिन्नघटनि
ष्ठप्रकारतानिरूपितविशेष्य
ता भिन्न समवायसंबंधावच्छि
न्ननिष्ठप्रकारतानिरूपित
पुरुषनिष्ठविशेष्यताशालीवे
यः

त॰ कौ॰ १ षाणस्थावरभेदात्त्रिविधः मृत्पाषाणौ प्रसिद्धौ स्थावरा वृक्षलतादिः आ
२ प्यत्वसामान्यवत्य आपः रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग
परत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारात्मकचतुर्दशगुणवत्यः ताश्चा
पि द्विविधाः नित्या अनित्याश्चेति नित्याः परमाणुलक्षणाः अनित्याः
कार्यलक्षणाः ताश्चापि त्रिविधाः शरीरेन्द्रियविषयभेदात् शरीरमयो
निजमेव वरुणलोके प्रसिद्धम् इन्द्रियं रसग्राहकं रसनं रसनाग्रवर्ति वि
षयः सरित्समुद्रादिः हिमकरकादिश्च तेजस्त्वसामान्यवत्तेजः रूपस्प
र्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारा
त्मकैकादशगुणवत् तदपि द्विविधम् नित्यमनित्यं च नित्यं परमाणुरूपम्
अनित्यं कार्यलक्षणम् तदपि त्रिविधम् शरीरेन्द्रियविषयभेदात् शरी
रमयोनिजमेवादित्यलोके प्रसिद्धम् इन्द्रियं रूपग्राहकं चक्षुः कृष्णता

गुणत्वसामान्यवान् द्रव्यकर्मभिन्नः सामान्यवान्गुणः कर्मत्वसामान्यवत्
चलनात्मकं वा कर्म नित्यमेकमनेकसमवेतं सामान्यम् अपरसामान्याव
न्नित्यद्रव्यवृत्तिर्बुद्धिमात्रहेतुर्विशेषः नित्यसंबंधः समवायः भावभिन्नोऽभावः इति द्रव्या
दिसामान्यलक्षणानि अथ तद्विशेषलक्षणमुच्यते पृथिवीत्वसामान्यवती पृथि
वी रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रव
त्वसंस्कारात्मकचतुर्दशगुणवती सा द्विधा नित्यानित्या च नित्या परमाणुलक्षणा
अनित्या कार्यलक्षणा सापि त्रिविधा शरीरेन्द्रियविषयभेदात् शरीरमपि द्विविधं
योनिजमयोनिजं च तत्र शुक्रशोणितसन्निपातजं योनिजमस्मदादीनां शुक्र
शोणितसन्निपातं विना धर्मविशेषसहकृतं परमाणुभ्यः अयोनि
जं देवर्षिनारदादीनां इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति विषयोऽस्मा

न कै २ नेरजः भागस्तस्य च षष्ठो भागः परमाणुरुच्यते १ कारणे परिमाणादिकार्यम्
तच्च द्व्यणुकत्र्यणुकादिभेदेनानन्तविधम् तत्र द्वाभ्यां परमाणुभ्यां संयोगा
द्व्यणुकम् त्रयाणां संयोगात् त्र्यणुकं चतुर्णां त्र्यणुकानां संयोगाच्चतुर
णुकमेवं पंचाणुकादि भोगायतनमन्त्यावयवि शरीरं सुखदुःखान्यतर
भोगः द्रव्यानारंभकं कार्यद्रव्यमन्त्यावयवि शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियम् का
मिन्द्रियम् ज्ञायमानत्वे सति भोगसाधनं विषय इति शब्दसमवायिकारणमा
काशः शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागगुणषट्कवान् सच लाघ
वादेकः सर्वत्र कार्योपलंभात् विभुर्विभुत्वाच्च नित्यः तत्कर्णशष्कुल्यव
ने च्छिन्नः सन् शब्दग्राहकः श्रोत्रेन्द्रियात्मकः ज्येष्ठत्वकनिष्ठत्वयौगपद्यचिरत्वक्षिप्रत्वा
परत्वादिमेयः कालः संख्यापरिमाणपृथक्त्वसंयोगविभागगुणपंचकवान् सो
प्येको विभुर्नित्यश्च उपाध्युपाधि[illegible]भेदात्त्रिविधः अतीतानागतो वर्तमा २

अवर्त्ती विषयलक्षणं तेजश्चतुर्विधम भौमदिव्योदर्याकरजभेदात पार्थिवं
धनं वन्ह्यादि भौमं अविंधनं सौरविद्युदडवानलादि दिव्यम भुक्ताहारपरिणा
महेतुर्जठरानलरूपमौदर्यम सुवर्णादिजलादि आकरजम वायुत्वसामान्य
वान्वायुः स्पर्शसंख्यापरिमाणसंयोगविभागपरत्वापरत्वसंस्कारात्मकगुणनव
कवान स द्विविधः नित्योनित्यश्च नित्यः परमाणुलक्षणः अनित्यः कार्य
लक्षणः अनित्यस्त्रिविधः शरीरेन्द्रियविषयभेदात शरीरमयोनिजमेव वायु
लोके प्रसिद्धम इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरव्यापि विषयो महावाय्वादिः
शरीरांत-संचारी वायुः प्राणः हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः उदानः
कंठदेशस्थो व्यानः सर्वशरीरगः १ स एक एव क्रियाभेदात् प्राणापानव्यानोदानसमान
संज्ञां लभते ननु शरीरे पंचभूतानां समानदेशत्वविरोधात मूर्त्तत्वे सति निरवय
वं परमाणुः स चातीन्द्रिय एव ननु कथम जालांतरस्थसूर्य्यरश्मौ यत्सूक्ष्मं दृश्य

त॰ कौ॰
७

नीश्वरः संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धीच्छाप्रयत्नगुणाष्टकवान्
स चैक एव शरीरहीनश्च शरीरहेतुत्वदृष्टाभावात् यद्यपि शरीरं पुरुषादृष्टेन
कार्यं शरीरस्यैव अस्मदादिदृष्टेन तच्छरीरस्य जननसम्भवात् न चास्मदादि
दृष्टेन मुक्तस्यापि शरीरोत्पादः स्यात् इति वाच्यम् शरीरहेतोर्भोगादृष्टस्याभावा
त् अत एव चतुर्भुजत्वादिश्रवणं संगच्छते द्विविधोप्यात्मा विभुः मनस्त्व नित्यत्व
सामान्यवान्मनः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेग
संस्कारगुणाष्टकवत् तदेव सुखाद्युपलब्धिसाधनमिन्द्रियम् प्रतिजीवंभिन्न
मणु नित्यं च इति द्रव्यविशेषलक्षणानि अथ गुणविशेषलक्षणानि उच्य
न्ते चक्षुर्मात्रग्राह्यजातिमान् गुणो रूपम् गुणपदं प्रभावारणाय तच्च शुक्ल
कृष्णपीतरक्तहरितकपिशभेदात् षड्विधम् शुक्लादिषड्विधं पृथिव्यामेव
शुक्लं स्वच्छं जले भास्वरं तेजसि रसनामात्रग्राह्यजातिमान् गुणो रसः स

नष्टेति तज्ज्ञप्ति ध्वंसविशिष्टः कालस्तत्र अतीतकालः तद्धातिप्रागभा
वविशिष्टः कालस्तत्रके ऽनागतकालः तद्वत्कि ध्वंसप्रागभावानवच्छिन्नः का
लः तद्वत्के वर्तमानः कालः भूतत्वसान्ति इति तत्वज्ञानाधीनापत्त्वोपपत्त्यानुमेया
दिक् संख्यापरिमाणपृथक्त्वसंयोगविभागगुणपंचकवती सा चैकाविभ्वी नि
त्या च तथाप्युपाधिभेदाच्चतुर्विधा प्राची प्रतीची उदीची दक्षिणा चेति उदया
चलसंनिहिता दिक् प्राची अस्ताचलसंनिहिता दिक् प्रतीची सुमेरुसंनि
हिता दिक् उदीची सुमेरुव्यवहिता दक्षिणा आत्मत्वसामान्यवान् आ
त्य त्मा स द्विविधः जीवेश्वरभेदात् अनिर्ज्ञानादिमान् जीवः संख्यापरिमाण
पृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुणच
तुर्दशवान् सचसुखदुःखादिवैचित्र्यात्प्रतिशरीरं भिन्नः नित्यज्ञानादिमा

॥ –

त-को चित्रमेस्ते नाप्यविविधास्त्यपिकेचित् नीलपीतादि मधुरतिक्तादि सुरभ्यसुरभ्यादि सुकु
५ मारकाठि नायकपवारथ पदादि बुद्धिजाः अभ्यजाविजाः गमनव्यवहारासाधा
रणकारणंसंख्या साद्विधा एकानेकवृत्तिभेदात् तत्रैकत्वमेकवृत्ति तच्चनित्यगतंनि
त्यं अनित्यगतमनित्यम् द्वित्वादिकमनेकवृत्ति तच्चानेकत्वविषयापेक्षाबुद्धिजन्यं
तन्नाशानाश्यं चेति॥ मानव्यवहारासाधारणंकारणंपरिमाणम्॥ तच्चतुर्विधम्॥ अ
णु ह्रस्वमहद्दीर्घं चेति अणु ह्रस्वपरिमाणं परमाणुद्व्यणुकयोः महद्दीर्घपरिमाणं त्र्य
णुकचतुरणुकादौ चतुर्विधमपि द्विविधम्॥ नित्यमनित्यंच नित्यगतंनित्यं अनित्यगतंचा
नित्यं तत्त्रिविधम् संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेति तत्र द्व्यणुकपरिमाणं परमाणु
द्वित्वसंख्याजन्यं त्र्यणुकपरिमाणं च द्व्यणुकत्रित्वसंख्याजन्यम्॥ तदवयवगताणुपरि ५

वमधुरतिक्तकटुकषायाम्ललवणभेदात् षड्विधः सद्विधोपिरसः पृथिव्या
मेव मधुरएवजले घ्राणमात्रग्राह्यजातिमान्गंधः सद्विविधः पृथिव्यामे
व त्वङ्मात्रग्राह्यजातिमान्स्पर्शः सत्रिविधः शीतोष्णानुष्णाशीतभेदा
त् शीतोजलेउष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः द्विविधायामपिपृ
थिव्यां रूपादयःपाकजत्वादनित्याः पाकजाश्च तत्रहितेजःसंयोगः श्या
मादिनिवृत्तौ रक्ताद्युत्पाददर्शनात् तत्रापिपूर्वरूपादिनाशेरूपांतरोत्पादकः
पाकः परमाणुष्वेवेतिवैशेषिकमतम् द्व्यणुकाद्यवयविष्वपीतिनैयायिकाः
जलतेजोवायुवृत्तिस्पगताः रूपादयोनित्याः अनित्यगताश्चानित्याः उद्भू
तोऽनुद्भूतभेदेनापिरूपादयश्चत्वारोद्विविधाः घ्राणरसनचक्षुस्त्वग्ग्राह्यावनु
द्भूताउद्भूतास्तद्योग्यपृथिव्याद्यारंभकपरमाणुद्व्यणुकत्र्यणुकादौ चित्रा

त.कौ. द्विविधः अन्यतरकर्मजस्तु उभयकर्मजश्चेति आद्यः श्येनशैलयोः द्वितीयस्तु मेषयोर्मल्ल-
६ योर्वा हस्तमात्रजनकविभागात्कायजन्यविभागो विभागजश्चेति संख्यादयः पंच सर्वद्रव्यवृत्तयः
परव्यवहारासाधारणं परत्वम् अपरव्यवहारासाधारणकारणमपरत्वम्॥ ते द्विविधे।
कालकृते दैशिके च योयदपेक्षया ज्येष्ठस्तत्र तदवधिकं परत्वं कालकृतं योयदपेक्ष-
या कनिष्ठस्तत्र तदवधिकमपरत्वं कालकृतं अत्र कालपिंडसंयोगोऽसमवायि।पापि
जैष्ठ्यकनिष्ठत्वज्ञानं निमित्तं नन्ताद्यनाशाश्रयनाशान्नाशाद्विनिमित्तम् एतेऽनित्यद्रव्य-
कृ एव योयदपेक्षया दूरस्थस्तत्र तदवधिकं परत्वं दैशिकं योयदपेक्षया सन्निहितस्तत्र
तदवधिकमपरत्वम् दैशिकं अत्र दिक्पिंडसंयोगोऽसमवायि दूरत्वसन्निहितत्वज्ञा-
ननिमित्तम् तन्नाशाश्रयनाशाभ्यां नाशाद्विनिमित्तम् एतेऽनित्यद्रव्यपव ६२९७७८९६

माणस्य स्वसमानजातीयोत्कृष्टजनकत्व-नियमात् अणुपरिमाणापरिमाणाजन्ये द्व
यवगतमहत्त्वस्यैव तत्रासमवायित्वात् तूलपिण्डपरिमाणं प्रचयजन्यम्। अवयवानां शिथि
लः संयोगः प्रचयस्तस्यैव तत्रासमवायित्वात्। पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं त
दपि द्विविधम् एकानेकवृत्ति भवेत्॥ तत्रैकपृथक्त्वमेकवृत्ति द्वित्वं चानित्यगतं नित्यगतं नित्यम् अनित्य
गतमनित्यम्। द्विपृथक्त्वाद्यनेकवृत्ति तच्चानेकपृथक्त्वविषयापेक्षाबुद्धिजन्यम्॥ तन्नो
प्राप्तयोः संयुक्तव्यवहारासाधारणं कारणं संयोगः॥ स द्विविधः कर्मजः संयोगजश्च। कर्मजो
पि द्विविधः अन्यतरकर्मजः उभयकर्मजश्च आद्यः श्येनशैलयोः द्वितीयस्तु मेषयोर्मल्लयो
र्वा। हस्ततरुसंयोगात्कायतरुसंयोगः संयोगजः। विभक्तव्यवहारासाधारणं कारणं वि
परत्वम् तेवि। अविधेकालकृते ऽवि भागः॥ सोऽपि द्विविधः कर्मजो विभागजश्चेति कर्मजोपि

कारणं यथा तंत्वादिकं पटस्य कपालादिकं घटस्य अन्यथासिद्धिशून्यत्वमनन्यथासिद्धं
अन्यथासिद्धिस्त्रिविधा येन सहैव यस्य यं प्रति पूर्वभावोऽवगम्यते तेन तस्य तं
प्रत्यन्यथासिद्धिः यथा घटं प्रति दण्डेन दण्डरूपस्य दण्डत्वस्य च दण्डेन सहैव दण्ड
रूपस्य दण्डत्वस्य वा घटं प्रति पूर्वभावावगमात् अतः प्रतिपूर्ववर्त्तित्वे ज्ञात एव यस्य यं
प्रति पूर्ववृत्तित्वं गृह्यते तं प्रति तस्यान्यथासिद्धिर्द्वितीया यथा घटं प्रत्याकाशस्य कु
लालपितुश्च आकाशस्य ह्याकाशत्वेन घटं प्रति पूर्ववर्त्तित्वं ग्राह्यं आकाश
त्वं च शब्दसमवायिकारणत्वम् तच्च शब्दनियतपूर्ववृत्तित्वघटितम् तथा
च शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति पूर्ववृत्तित्वग्रहणात् घटं प्रत्याकाशस्यान्यथा
सिद्धिः एवं कुलालपितुरपि कुलालपितृत्वेन घटं प्रति पूर्ववृत्तित्वं ग्राह्यं कुलालपितृत्वं
च कुलालजनकपुंस्त्वम् तच्च कुलालनियतपूर्ववृत्तित्वघटितम् तथा च कुलाले

बुद्धित्वसामान्यवती ॥ सर्वप्रकाशो बुद्धिः सा द्विविधा स्मृतिरनुभवश्च संस्कारजन्यं ज्ञानं
स्मृतिः यथा सामल्लिकलोकस्य विशेषघटइत्यादि तत्र पूर्वानुभवः कारणं संस्कारो व्यापारः
नच सोयं देवदत्त इति प्रत्यभिज्ञायामतिव्याप्तिः तत्र संस्कारजनितत्वात्स्मृतिरेवहेतु
नतु संस्कारोपीप्रतिव्याप्तिविरहात् स्मृतिभिन्नं ज्ञानमनुभवः ॥ स भवजातिभेदाच्चानुभवः
स्तु द्विविधः प्रमा ऽप्रमा चेति प्रमात्वाभासजन्यो ऽयथार्थानुभवो ऽप्रमा सो ऽपि द्विधा भ्रमसं वि
शयभेदात् विपरीतनिश्चयो भ्रमः यथा पीतः शंखः लोहितः स्फटिकः एकस्मिन्धर्मिणि विरु
द्धनानाकोटिकज्ञानं संशयः यथा दूरवर्तिनि उच्चैस्तरे ॥ अयं स्थाणुर्वा पुरुषो वेति यथा
र्थानुभवः प्रमा फलवत्प्रवृत्तिजनकयोग्यत्वं यथार्थत्वं स च तदनुभवस्यासाधारणं प्रमा
करणं प्रमाणं व्यापारवत्कारणं करणं यथा छिदिक्रियायां परशुनिकुठारः तत्र कालत्वेस
ति तज्जन्यजनको व्यापारः यथा कुठारदारुसंयोगः ॥ अनन्यथासिद्धनियतपूर्ववृत्ति

कौ.त.
८

यत्
समवायित्तिमित्तभेदात् तत्समवेतं कार्यं तत्समवायिकारणं यथा तंतवः
पटस्य कपालानि घटस्य पटघटादिस्वगतरूपादेः समवायिकारणेषु
प्रत्यासन्नं कारणमसमवायिकारणम् यथा तंतुसंयोगः पटस्य तन्तुरूपं पट
समवायिकारणेषु तेषु प्रत्यासन्नत्वात्कारणत्वाच्च एवं तंतुरूपादि
पटरूपादेः तस्यापि पटरूपादिसमवायिकारणे पटे स्वाश्रयसमवेत
तेन प्रत्यासन्नत्वात्कारणत्वाच्च समवाय्यसमवायिकारणातिरिक्त
कारणतावन्निमित्तकारणम् यथा तुरीवेमादिकं पटस्य दंडचक्रादि २
कं घटस्य तच्च प्रमाणं द्विविधम् प्रत्यक्षानुमानभेदात् शब्दादेरा कम:
नुमानविधैयेन प्रामाण्यमिति वैशेषिकमतं चतुर्विधमिति ने

प्रतिपूर्ववृत्तित्वे सति तं एव घटं प्रतिपूर्ववृत्तित्व प्रागभाव घटं प्रति कुलालपितान्यथासिद्धः अ
न्यत्र ला. प्रतिनियतपूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतत्वमन्यथासिद्धि यत्तोपा
यथा घटत्वविशेषं प्रति दंडवाद गलदरासभस्य घटविशेषादन्यत्र घटं तद लो प्रतिनिय
तपूर्ववृत्तं दंडः चक्रादिरेव घटविशेषस्यापि संभवे दंडचक्रादि सहभूतादेव रासभ
तरासभो ऽन्यथासिद्धः रासभसामान्यस्य घटसामान्यं प्रति हेतुत्ववारणा
य नियतपूर्ववर्तिनी न्यत्रानियतपदं तत्र पश्चात्कोऽन्यथासिद्धिरभावात्तेन
हि घटसामान्यादन्यत्र पटादौ लो प्रतिनियतपूर्ववृत्तित्वं च ऽप्रक्षेतत्वे
यो मादेर्घटसामान्यस्य संभवः येन पूर्वकोऽन्यथासिद्धिः स्यात् नियतपूर्ववृत्ति
त्वं च ऽप्रव्यवहितपूर्वकालावच्छेदेन कार्यदेशसत्वं न चैवं रासभसा
मान्येऽस्त्यतो नातिव्याप्तिरिति संक्षेपः तच्च कारणं त्रिविधम् समवाय

त॰ कौ॰
१०

कर्षस्त्रिविधः सामान्यलक्षणो ज्ञानलक्षणो योगजधर्मश्चेति एतत्त्रितयसन्निक
र्षः षड्विधसहकारि इति संप्रदायविदः मनस एवतत्सहकारीति तन्मूलयातिनि
ष्ठाः तत्र सामान्यं ज्ञायमानसामान्यमेव स्वाश्रयाणां सन्निकर्षः ज्ञायमानघट
त्वसन्निकर्षेण घटा इत्याकारकं सकलघटानां प्रत्यक्षं जन्यते ज्ञानलक्षणस
न्निकर्षेण तु तद्विषयीभूततत्पदार्थानां प्रत्यक्षं जन्यते कथमन्यथा कचि
दंकाश्ममूलभूततत्पदार्थसंसर्गज्ञानम् एवं सुरभिचंदनमिति चाक्षुषे सौरभ
स्यापि भानं ज्ञानसन्निकर्षेण सौरभस्य चक्षुरयोग्यत्वेन चक्षुःसंयुक्तचेदं समवा न
यस्य तत्र सत्त्वेऽप्यप्रयोजकत्वात् योगजधर्मसन्निकर्षेण च योगिनां सूक्ष्मवस्तु
परिमाणस्य प्र त्यक्षं जन्यते तच्च प्रत्यक्षं षड्विधम् घ्राणरसनचक्षुः

येन शब्दत्वादि ग्रहः इह शब्दे शब्दत्वं गुणत्वादिकं अस्ति इति श्रोत्रसमवेतश
ब्दे शब्दत्वादेः समवायात् विशेषणतया समवायाभावयोर्ग्रहः तथाहि विशे
षणता द्विविधा इंद्रियविशेषणता इंद्रियसंबद्धविशेषणता चेति तत्रेंद्रियविशे
षणतया शब्दसमवायस्य शब्दाभावस्य ग्रहः इह शब्दे समवायोस्ति इह शब्दो ना
स्तीति श्रोत्रेंद्रिये शब्दसमवायस्य शब्दाभावस्य च विशेषणत्वात् इंद्रियसंबद्धवि
शेषणतया घटादिसमवायस्य घटाभावस्य ग्रहः इह कपाले घटसमवा
योस्ति इह भूतले घटो नास्तीति चक्षुरादिसंयुक्ते कपाले घटसमवायस्य भू
तले च घटाभावस्य विशेषणत्वात् समवायस्य प्रत्यक्षवर्णनं न्यायमते
न वैशेषिकमते समवायो ऽतीन्द्रियः अलौकिकप्रत्यक्षहेतुं सन्नि

त·कौ· अनोद्भूता इति न तत्प्रत्यक्षम् एवं भेर्यादिदेशोत्पन्नः शब्दः वीचीतरंग
१५ गन्यायेन कदंबगोलकन्यायेन श्रोत्रदेशोत्पन्नः शब्दः श्रोत्रेणोप।
तस्यैव श्रोत्रसंबंधसंभवात् अत्र घ्राणरसनश्रोत्राणि द्रव्याग्राह
काणि चक्षुस्त्वङ्मनांसि द्रव्यग्राहकाणि महत्त्वोद्भूतरूपवद्द्रव्यम्
चक्षुषो योग्यम् एवं महत्त्वोद्भूतरूपस्पर्शवद्द्रव्यं त्वचो योग्यम्।
अत एव परमाणुवायुपिशाचादयश्च चक्षुषा त्वचा न गृह्यन्ते प
रमाणोर्महत्त्वाभावात् वायो रूपाभावात् पिशाचादेरुद्भूतरूपाभा
वात् अत एव प्रभापि त्वचा न गृह्यते तत्रोद्भूतस्पर्शाभावात् ए
वं योग्यद्रव्यसमवेताः द्रव्यत्वादिसामान्यकर्मसंख्यापरिमाण

रसनं स्पर्शप्रत्यक्षासाधारणकारणं त्वक्

श्रोत्रं त्वक् मनोभेदात् गंधप्रत्यक्षासाधारणं कारणं घ्राणम् रसप्रत्यक्षासाधा
रणं कारणं त्वक् शब्दप्रत्यक्षासाधारणं कारणं श्रोत्रम् सुखादिप्रत्यक्षासा
धारणं कारणं मनः घ्राणादिलक्षणे साधारणपदमात्मनिवारणाय गंधा दि
दिप्रत्यक्षं च चंदने सौरभम् गुडे मधुरो रसः पटे रक्तो वर्णः जले शीतस्प
घ्रा र्शः वने सिंहनादः मयि सुखमित्यात्मकारकमनःकरणीभूतस्य घ्राण
घ्रा देर्व्यापारो घ्राणादिमनःसंयोगः मनसस्त्वात्मसंयोगः न च घ्राणादेर्गं
धादिप्रत्यक्षजनकत्वे प्रमाणमस्ति गंधादेरपि प्रत्यक्षं स्यादिति
वाच्यम् यतो गंधादयो महत्त्वसमानाधिकरणा एव घ्राणादिग्रा
णं ग्राह्याः परमाणुगंधादयश्च न महत्त्वसमानाधिकरणाः अतो न गंधादय

स्व

त०कौ० मिँतिचेत् उच्यते महानसादौ दृष्टांते वन्हिधूमयोर्भूयः सहचार
१२ दर्शनात् व्याप्यत्वेन धूमज्ञानं प्रथमं ततः पर्वतादौ धूमं दृष्ट्वा व्या
प्यत्वेन स्मरणम् द्वितीयम् ततस्तत्रैव व्याप्यत्वेन धूमस्यप
रामर्शो वन्हिव्याप्यधूमवानयमित्येवंरूपो जायते इति ततो प
त्वंमत्स्यैतिवोध्यम लिंगज्ञानजन्यं लिंगिज्ञानमनुमितिः पक्षा
पर्वतादौ धूमज्ञानानंतरं पर्वतो वन्हिमानितिज्ञानम् व्याप्तिप
द्धर्मताज्ञानाल्लिंगम् ननु केयं व्याप्तिरिति चेदुच्यते न व्याभि(त्तम
साध्य चारितैस्समानाधिकरण्यं व्याप्तिः अत्तिचेदे पर्वतो वन्हिमा
न्धूमवत्वादित्यादिसद्धेतौ यत्र यत्र धूमस्तत्र वन्हिरिति नियमा १२

पृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहवेगास्तत्समवायसम्बद्धभावश्च
तुष्ट्रत्वचोपियोग्याः जीवात्मलक्षणं दुःखं मनोयोग्यम् तत्समवे
ता आत्मत्वादिसामान्यबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नास्तत्सम
वायसम्बद्धभावश्च मनोयोग्याः येनेन्द्रियेण यद्गृह्यते तेनेन्द्रियेण
तन्निष्ठं सामान्यं तत्समवायस्तदभावश्च गृह्यते इति नियमादि
ति व्याख्यातं प्रत्यक्षम् अथानुमानं निरूप्यते अनुमितिक
रणमनुमानम् तच्च धूमो वह्निव्याप्य इति ज्ञानम् वह्निव्याप्य व्याप्ति
धूमवानयमितिज्ञानं परामर्शो व्यापारः ततीपर्वतकप

त॰ कौ॰
२२

मित्साविरहविशिष्टसाध्यनिश्चयस्य तत्राभावात् पर्वतादौ साध्य
निश्चयेसत्यपिसत्वांचानुमित्सायां पर्वतोवन्हिमान् माक्तिपठमा
नसंभवात् तत्रपक्षतासंपत्तये अनुमित्साविरहविशिष्टत्वंसा
ध्यनिश्चयेविशेषणम् तथाचानुमित्साविरहविशिष्टसाध्यनिश्चय
स्यतत्राभावात् पक्षता तच्चानुमानं त्रिविधम् केवलान्वयिकेव
लव्यतिरेकि अन्वयव्यतिरेकि चेति यत्रान्वयव्याप्तिरेवास्ति तत्
केवलान्वयि यथा घटोभिधेयः प्रमेयत्वात् इति अत्र घटः पक्षस्त
स्याभिधेयत्वं साध्यम् प्रमेयत्वं हेतुस्तस्मिन् यत्रयत्र प्रमेयत्वं तत त्र

१२

त

त नास्ति चेदं पर्वतो धूमवान् वह्निमत्वात् इत्यादौ सद्धेतौ॰ पत्रैव वन्हिसा पत्र
ध्ये तत्र धूम इति नियमस्या सत्वात् न साध्यः पिंडे वन्हिसत्वेपि धूमा
कृत सत्वात् व्यभिचारस्तान विरुद्धसहैहेतुसाध्यसहचारदर्शन[illegible]ाि(
ग्राहकम कल्पनेत्यादिः ति चेद्विस्यम हेतोः साध्याभाववद्वृत्तित्वव्य
भिचारज्ञानेसति व्याप्तिग्रहाभावा [illegible] तदभावसाधकाप्रमहे
तुसाध्यसहचारदर्शनं तु अन्वयव्यतिरेकाभ्यां तत्र कारणम काप्र
नः पक्षधर्मता पक्षताश्रयवृत्तित्वं पक्षधर्मता पक्षतातुसिसा(धा
विरहविशिष्ठसाध्यनिश्चयाभावः अस्ति चेदं पर्वतोवह्नि [illegible]

त॰ कौ॰ ीरमात्रस्यपक्षीकरणात् अन्यत्रच हेतुसाध्ययोरेवासत्वात् पत्रान्व
१५ यव्याप्तिर्व्यतिरेकव्याप्तिश्चनिरूपते तदन्वयव्यतिरेकि यथापर्वतोव
ह्निमान्धूमादित्यादि अत्रपर्वतः पक्षः तस्यवह्निमत्वंसाध्यंधूमादि
त॰ सि॰ ति हेतुः यत्रयत्रधूमस्तत्रतत्रवह्निर्यथामहानसादौ इत्यन्वयव्या
प्तिः यत्रयत्रवह्न्यभावस्तत्रधूमाभावः यथाजलमहाह्रदादौ इति
व्यतिरेकव्याप्तिश्चास्ति अन्वयेसाधनंव्याप्यंसाध्यंव्यापकमिष्यते
साध्याभावोन्यथाव्याप्योव्यापकःसाधनात्ययः १ व्याप्यस्यवचनं
पूर्वंव्यापकस्यततःपरं एवंपरीक्षिताव्याप्तिःस्फुटीभवतितत्वतः
इतित्रयाणांमध्ये यदन्वयव्यतिरेकितत्पंचरूपोपन्नमेवस्व

राम
१५

त

त्तत्राभिधेयत्वं यथा पटः इत्यन्वयव्याप्तिरेवास्ति न तु यत्र यत्र साध्या
भावस्तत्र तत्र हेत्वभाव इति व्यतिरेकव्याप्तिः अभिधेयत्वस्य प्रमेय
त्वस्य च सर्वत्र सत्वात् साध्याभावादेवाप्रसिद्धत्वात् यत्र व्यतिरे
कव्याप्तिर्नास्ति न तु केवलव्यतिरेकि यथा जीवच्छरीरं सात्मकं प्राणा
दिमत्वात् इत्यादि अत्र जीवच्छरीरं पक्षः तस्य सात्मकत्वं साध्यम् प्राणा
दिमत्वं हेतुः अस्ति न यत्र यत्र सात्मकत्वाभावस्तत्र तत्र प्राणादिमत्वाभा
वः यथा घटादौ इति व्यतिरेकव्याप्तिरेवास्ति न तु यत्र यत्र प्राणादि
मत्वं तत्र तत्र सात्मकत्वमित्यन्वयव्याप्तिः दृष्टान्ताभावात् जीवच्छ

नवाक्यं प्रयुंक्ते तत्परार्थं पंचावयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पक्षे
साध्यनिर्देशः प्रतिज्ञा यथा पर्वतो वह्निमानिति पंचम्यंतं हेतुप्रति पंचम्यंतं हेतुप्र।
तिपादकं वाक्यं हेत्ववयवः यथा धूमादिति व्याप्तिप्रतिपादकं वचनमुदाह
रणम् यथा यो यो धूमवान्स स वह्निमान् यथा महानस इति व्याप्तिविशिष्ट
स्य हेतोः पक्षधर्मता प्रतिपादकं वचनमुपनयः यथा वह्निव्याप्य धूमवां
श्चायमिति अबाधितत्वासत्प्रतिपक्षितत्व तात्पर्यकं वाक्यं निगमनम्।
यथा तस्माद्वह्निमानिति यथा चायमिति उपनयस्य तस्मात्तथेति।
निगमनस्य शरीरमिति विभावः व्यतिरेकि लिंगे प्रतिज्ञाहेतू तुल्यावेव उदाह
रणोपनयनिगमनानि तु भिद्यंते यथा नेदं जीवच्छरीरं सात्मकं प्राणा।

विपक्षाद्व्यावृत्तत्वम् एतान्येतानि त्रिसाध्याभावत्वेन बाधित विषयत्वम्

८ १ साध्यं साधयति तानि पंच रूपाणि पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृ
त्तम् अबाधितविषयत्वम् असत्सपक्षत्वं चेति पक्षताश्रयवृत्तित्वम्
पक्षधर्मत्वं निश्चितसाध्यवान्सपक्षस्तत्र विद्यमानत्वम् सपक्षेसत्त्वम्
निश्चितसाध्याभाववान् विपक्षस्तत्राविद्यमानत्वम् साध्याभावसाध।
के हेत्वंतरशून्यवृत्तित्वम् असत्प्रतिपक्षत्वम् एतानि पंच रूपाणि वन्हिसा
धक धूमादावन्वयव्यतिरेकिणि विद्यन्ते केवलान्वयिनि विपक्षाद्व्याव
त्तिर्नास्ति विपक्षाप्रसिद्धेः केवलव्यतिरेकिणि सपक्षे सत्त्वं नास्ति सपक्षा
प्रसिद्धेः त्रिविधमनुमानं द्विविधम् स्वार्थं परार्थं चेति स्वस्यैवानुमिति
हेतु स्वार्थं स्वयं धूमादग्निमनुमाय परं बोधयितुं पंचावयवोपेतमनुमा

टी. ना चारज्ञाँ विषयव्याप्तिग्रहे प्रतिबंधकत्वम् व्यभिचारज्ञाने सति व्याप्तिग्रहानुदयस्य
२५ सुप्रसिद्धत्वात् सपक्षविपक्षव्यावृत्तत्वे सति पक्षवृत्तिरसाधारणः यथा शब्दो नि
त्यः शब्दत्वादिति शब्दत्वं हि सपक्षाद्गगनादेर्विपक्षाद्घटादेर्व्यावृत्तम् पक्षे शब्दे
वर्तते अयमसाधारणः एतज्ज्ञानं च साक्षादनुमितिप्रतिबंधकम् कथमिति
चेदित्थं शब्दत्वं हि नान्वयी हेतुः दृष्टांताभावात् किं तु व्यतिरेकी तथा च यो यस्मा। व्यावृ
त्तः स्वाश्रये तदभावं साधयति यथा धूमो वह्न्यभाववतो जलह्रदादेर्व्यावृत्तः
स्वाश्रये पर्वतादौ वह्न्यभावाभावं साधयति तथा शब्दत्वं नित्यत्ववतो गगना
देः सपक्षाद्व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावमनित्यत्वमपि साधयेत् एवं
नित्यत्वाभाववतो घटादेर्विपक्षाद्व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावाभावं
नित्यत्वमपि साधयेत् न चैकत्र शब्दे नित्यत्वानित्यत्वयोः संभवस्तयोर्विरोधात्
तस्माच्छब्दत्वेऽसाधारणज्ञाने सति न साध्यानुमितिरिति वस्तुमात्रपक्षकोऽयम्

दिमत्वात् इत्यत्र यत्सत्वं केन भवति तस्मा गोदिमत्वं भवति यथायटः
नचेदं जीवच्छरीरं प्राणादिमन्न भवति तस्मान्न तथेति अथ हेत्वाभा
साः अनुमितितत्करणान्यतप्रतिवंधकधर्मा ज्ञानविषयधर्मो
हेत्वाभासत्वोपाधिमन्तो हेत्वाभासाः तेचानैकांतिकविरुद्धसत् क
प्रतिपक्षासिद्धवाधिताः पंचहेत्वाभासाः तत्र सव्यभिचारोनैकां
तिकः स त्रिविधः साधारणोऽसाधारणोऽनुपसंहारी चेति त
त्र सपक्षविपक्षवृत्तिः साधारणः यथा पर्वतो धूमवान्वन्हेरिति
वन्हि हि सपक्षे महानसे विपक्षे तप्तायःपिंडे वर्त्तते ६ तत्साधारण
एतत्ज्ञानंच विशिष्टावगाहित्वे रूपव्यभिचारविषयकत्वाद्व्यभि
पर

त. कौ. त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति पक्षतावच्छेदकाभाववा-
१९ न्पक्षक आश्रयासिद्धः यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्द-
वदिति अत्र च अरविन्दे पक्षे गगनीयत्वं पक्षतावच्छेदकं नास्ति इत्यरविंदत्वं हेतुरा-
श्रयासिद्धः एतज्ज्ञानं परामर्शप्रतिबंधकं म अरविन्दे गगनीयत्वं नास्ती ना-
स्तीतिज्ञाने सुरभित्वव्याप्यारविंदत्ववद्गगनारविंदमिति परामर्शासंभवात् एत-
स्यारविंदे गगनीयत्वसंबंधावगाहित्वात् पक्षनिष्ठाभावप्रतियोगी स्वरूपासि-
द्धः यथा ह्रदो द्रव्यं धूमादिति अत्र च पक्षे ह्रदे धूमो नास्तीतिज्ञाने सति द्रव्यत्व-
व्याप्यधू× धूमस्याभावोऽस्तीति धूमो हेतुः स्वरूपासिद्धः एतज्ज्ञानमपि परा- राम
मर्शप्रतिबंधकं ह्रदे× धूमवान् ह्रद इति परामर्शासंभवात् एतस्य ह्रदे धूमसंबंधा-
वगाहित्वात् व्याप्यतावच्छेदकाभाववान् हेतुर्व्याप्यत्वासिद्धः यथा पर्वतो व- १९
ह्निमान्कांचनमयधूमादिति अत्र च धूमे व्याप्यतावच्छेदकत्वेनाभिमतं कां-

पसंहारी यथा सर्वमनित्यं प्रमेयत्वादित्यत्र सर्वस्यैव पक्षत्वात् प्रमेयत्वं हेतुरनुपसंहारी ।
एतत्ज्ञानमपि व्याप्तिग्रहप्रतिबंधकं सर्वस्य पक्षत्वे व्याप्तिग्राहकसहचारदर्शनस्या-
लाभाभावेन सहचारनिश्चयाभावे सति व्याप्तेरनिश्चयात् साध्याभावव्याप्तो हेतुर्विरुद्धः
यथायं गौरश्वत्वादिति अत्र पक्षपक्षाश्वत्वं तत्र तत्र गोत्वाभाव इति साध्याभावव्या-
प्तेः सत्वादश्वत्वं हेतुर्विरुद्धः एतज्ज्ञानं च साक्षादनुमितिप्रतिबंधकम् गोत्वाभावव्या-
प्याश्वत्ववतो ज्ञाने सति गोत्वनिश्चयासंभवात् साध्याभावसाधकं हेत्वंतरं प्रतिपक्षः
तद्वान् सत्प्रतिपक्षः यथा पर्वतो वह्निमान् धूमात् महानसवत् स वह्न्यभाववान् पाषा-
णमयत्वात् कुड्यवदिति अत्र च द्वयोरपि हेत्वोः परस्परसाध्याभावसाधकत्वौ सत्प्रति-
त्प्रतिपक्षत्वम् एतज्ज्ञानं च साक्षादनुमितिप्रतिबंधकम् वह्निव्याप्यधूमवान् व-
ह्न्यभावव्याप्यवांश्च पर्वतः इति द्विविधपरामर्शे सति एकस्मादप्यनुमितेरभावात् प-
रस्परप्रतिबंधात् परामर्शप्रतिबं ।क ज्ञानविषयधर्मोऽसिद्धिस्तद्वान् असिद्धः स

नै.कौ. धिकोपिहेत्वाभासोस्तीतिकथं पंचैवेत इतिचेन्न व्यभिचारादिज्ञानस्येवोपा(
९१ धिज्ञानस्यानुमितितत्करणान्यतरप्रतिबंधकत्वाभावेनोपाधेर्हेतुदोषत्वाभा
६ वात् कथंतर्हि व्याप्त्यनुमानेउपाधिरुपन्यस्यत इतिचेत् व्यभिज्ञानप्रयोजक चार
त्वेनतत्तदुपन्यासात् अथकोयमुपाधिरितिचेदुच्यते साध्यव्याप
कत्वेसतिसाधनाव्यापकउपाधिकः यथाधूमवान्वह्नेरित्यार्द्रेंधनंभव(
तिचतत्साध्यधूमस्यव्यापकं यत्रधूमस्तत्रार्द्रेंधनमितिसत्वात् भवति
चसाधनस्यवह्नेरव्यापकम् यत्रवह्निस्तत्रार्द्रेंधनमित्यसत्वात् तप्ता
यःपिंडेवह्निसत्वेप्यार्द्रेंधनाभावाभावात् एवंयागीयपशुहिंसा अधर्म राम
क्त

नमयत्वंनास्तीति धूमोहिर्प्याप्यावासिद्धः एतज्ज्ञानमपि परामर्शप्रतिबंधकम

धूमे कांचनमयत्वंनास्तीतिज्ञानेसति वन्हिव्याप्यकांचनधूमवान पर्वत इति

परामर्शासंभवात एतस्यधूमेकांचनमयत्वसंबंधावगाहित्वात साध्याभा

कौ ववद्वत्पदंबाधित यथावन्हिरनुष्णः पदार्थत्वाज्जलवदिति अत्रचव

न्होपत्ते अनुष्णत्वाभावस्योष्णत्वस्य त्वगिंद्रियेणनिश्चयात पदार्थत्वहेतुः

बाधितः एतज्ज्ञानंसाक्षादनुमितिप्रतिबंधकम वन्हावनुष्णत्वंनास्तीति

ज्ञानेसति वन्हिरनुष्ण इत्यनुमितेरसंभवात तदभावलौकिकनिर्णयस्यत

द्वत्ताज्ञानेप्रतिबंधकत्वात इतिहेत्वाभासाः ननूपाध्येहिहेतुदोषत्वात्सोपा

अत्र गोसादृश्यज्ञानं करणम् अतिदेशवाक्यार्थस्मरणं व्यापारः इत्युपमाननिरूपणम्

त. कौ.
१८

श्चिन्नागरिकः किंचिद्वनेचरं कीदृशो गवयपदवाच्य इति पृच्छति स्म तेन ते
न गोसदृशो गवयपदवाच्य इत्युक्ते सति स कदाचिद्वनं गतो गोसदृशं पिंडं पश्य
न् प्रागुक्तातिदेशवाक्यार्थं स्मृत्वा असौ गवयपदवाच्य इति प्रतिपद्यते सोऽप
मितिः अथ शब्दो निरूप्यते शाब्दप्रमाकरणज्ञानविषयः शब्दः यथा
नदीतीरे पंचफलानि संतीत्यादिवाक्यप्रयोगाच्च यथार्थज्ञानं शाब्दप्रमा अत्र
पदज्ञानं करणम् पदजन्यपदार्थोपस्थितिर्व्यापारः पदोपस्थितानां पदार्था
नां मिथो संसर्गो वाक्यार्थः पदसमूहो वाक्यम् अर्थवाचकं पदं मुख्यगौण तत्र द्विवि
भेदात् तत्र शक्त्या यमर्थमुपस्थापयति तस्मिन्नर्थे मुख्यम् यथा गो धम् ३
पदादि पदं लक्ष्यार्थस्योपस्थापकं गौणपदादिपदं अमुख्यं लक्षणयार्थोपस्थापको यथा

त्वं यत्र यत्राधर्मसाधनत्वं तत्र तत्र निषिद्धत्वमिति निषिद्धत्वात् साधनत्वस्य हिंसात्वस्य व्यापकम्

साधनं हिंसात्वात् क्रतुबाह्यहिंसावत् इत्यत्र निषिद्धत्वमुपाधिः भवति हि
तत् अधर्मसाधनत्वस्य साध्यस्य व्यापकम् यत्र हिंसात्वं तत्र तत्र निषिद्ध(
त्वमित्यसत्वात् पक्षीकृतायां हिंसायां हिंसात्वसत्वेपि निषिद्धत्वस्याभा
वात् एवं गर्भस्थो मित्रातनयः श्यामो मित्रातनयत्वात् दृश्यमानमित्रातनय
पुत्रवत् इति अत्र शाकपाकजत्वमुपाधिः न च श्यामत्वस्य काकादौ
सत्वे शाकपाकजत्वाभावात् साध्याव्यापकत्वं काकादिव्यावृत्तश्याम
त्वस्यैवात्र साध्यत्वात् इत्यनुमाननिरूपणम् अथोपमानं निरूप्यते
तत्रोपमितिकरणमुपमानम् तच्च सादृश्यज्ञानात्मकम् उपमितित्व(
जातिमदुपमितिः कथमियमुत्पद्यते इति चेदुच्यते गवयमजानन्नक

णम

त.कौ. नासिंचतीत्यादौ नान्वयबोधः योग्यताविरहात् पदानामव्यवधानेन संनिधिः यथा
१२ गामानयेत्यादौ पदानामविलंबेनोच्चारणं संनिधिः अत एवैकैकशः प्रहे प्रह
रे सहोच्चरितेगामानयेत्यादौ नान्वयबोधः संनिध्यभावात् सोयं वाक्यं त्रिविधः
विधिनिषेधार्थवादभेदात् तत्रप्रवृत्तिपरं वाक्यं विधिः यथा ज्योतिष्टोमेन स्वर्गका
मो यजेत ओदनकामस्तंडुलं पचेत् इत्यादि ज्योतिष्टोमनामकयागः स्वर्गरूपेष्ट
साधनम् तंडुलकर्मकपाकः ओदनरूपेष्टसाधनमित्युभयत्र वाक्यार्थः यजेत् प
चेत् इत्यादिविधिप्रत्ययेनेष्टबोधस्यापनात् निवृत्तिपरं वाक्यं निषेधः यथा न क
लंजं भक्षयेत् इति नेष्टविशेषसाधनमिति वाक्यार्थः इष्टविशेषस्यात्र पापाजनक
त्वेन तस्यैव वाक्यतात्पर्यात् विधिनिषेधभिन्नः शब्दोऽर्थवादः यथा आदित्यो
इति कलंजभक्षणं

विना पदकर्मकत्वानन्वयित्वं च पदान्तरजनकत्व
भावत्वं कारकपदस्य क्रियापदेन

कारकोः नादि संकेतः शक्तिः : यल्लक्षणो वस्या पदार्थेऽनुपपत्त्यापद्यति तत्र तस्मिन्
र्की गोण्णर लाक्षणिक मित्युच्यते यथा गंगायां घोष इत्यत्र तीरे पक्षक्षणा पकं गंगापदं
प्रवाहसंबंधो लक्षणा यथा गंगापदप्रवाहस्य वाहस्य तीरेण संयोग संबंधो गंगापदलक्षणा ।
यातस्य चै शाब्दस्याकांक्षा योग्यता संनिधयः सहकारिणः : यस्य पदस्य येन पदेन (
विनान्वयानुभवजनकत्वं नास्ति तस्य पदस्य तेन पदेन समभिव्याहारात् आकांक्षा
घटमानयेत्यादौ कारकपदस्य क्रियापदेन सह आकांक्षा एवं क्रियापदस्य कारक
पदेनापि सह बोध्या अत एव गौरश्वः पुरुषो हस्तीत्यादौ नान्वयबोधः : आकांक्षा
विरहात् एकपदार्थे परपदार्थसंसर्गो योग्यता यथा पयसा सिंचतीत्यादौ पयः
पदार्थे सेक संसर्गस्य कार्यकारणभावलक्षणस्य सत्वा योग्यता अत एव वह्नि

त. को. हेप्रत्यक्षस्यैवसहकारित्वे नतुप्रमाणांतरम् प्रत्यक्षेणैवाभावग्रहोपपत्तिः
२. अन्यथेह घटोनास्तीति निश्चयानंतरं मिह घटाभाववानित्याकारकोऽभीति प्रती
त्यनुपपत्तेः प्रामाण्यंस्वतोग्राह्यं परतोवेति विचार्यते दूरात्प्रत्यक्षेण जला
दिज्ञानेजाते तत्रस्वत एव यथार्थज्ञानत्वरूपं प्रामाण्यस्य ग्राह्य ज्ञानग्राह
कग्राह्यत्वरूपस्वतस्त्वं तोऽप्रामाण्यमिति मीमांसकानां स्वत एव प्रामाण्य
ग्रहे ज्ञानग्रहणानंतरं कश्चिज्जातंमे जलज्ञानं प्रमा नवेति प्रामाण्यसंशयो
नस्यात् निश्चिते संशयाऽयोगात् नच संशयस्थलेज्ञानग्रहोपिनास्ती
तिवाच्यम् ज्ञानाग्रहे ज्ञानधर्मिकप्रामाण्यतदभावकोटिकसंशयानु
पपत्तेः संशये धर्मिज्ञानस्य हेतुत्वात् नहि ग्रीवतिंष्वेस्तीधर्मिणि ग्र

रूप: अग्निर्हिमस्य भेषजम् वज्रहस्त: पुरंदर । इत्यादि स चायं शब्दो लोके वेदे
च समान: इयांस्तु विशेष: किंचिदेव लौकिकं प्रमाणं यदाप्तोक्तं वेदवाक्यं तु सर्व
मपि प्रमाणं परमाप्तेन भगवता कृतत्वादिति इति शब्दनिरूपणम् अर्थापत्तिस्तु
नप्रमाणंनाम पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा दिवाभोजिनो रात्रिभो
जनमंतरेण पीनत्वमनुपपन्नमिति ज्ञानानंतरं देवदत्तो रात्रौ भुंक्ते इति निर्णीय
ते न स्वप्रव्यतिरेकिसाध्यत्वात् तथा हि देवदत्तो रात्रौ भुंक्ते दिवा अभुंजानत्वे
सति पीनत्वात् यस्तु रात्रौ न भुंक्ते स दिवा अभुंजानत्वे सति पीनोपि न भवति
यथा देवदत्तो दिवा रात्रौ वा भोजी अर्थापत्तिरपि व्यतिरेकिण एव न मानां
तरमिति घटोपलंभो घटाभावाग्रहात् प्रतियोग्यनुपलब्धिरभावग्र

त॰कौ॰ नविषयिणीचेति सुखंदुःखाभावश्चफलम् तदिच्छां प्रति फलज्ञानमात्रंका
२१ रणम् साधनेच्छांप्रति फलसाधनताज्ञानंकारणम् द्वेषत्वसामान्यवान्
प्रज्वलनात्मकोद्वेषः सद्विविधः दुःखविषयः तत्साधनविषयश्च दुःख
द्वेषंप्रतिदुःखज्ञानमात्रंकारणम् साधनद्वेषंप्रति दुःखसाधनताज्ञानंका
रणं प्रयत्नत्वसामान्यवानुत्साहरूपः प्रयत्नः सत्रिविधः प्रवृत्ति
निवृत्तिजीवयोनिभेदात् चिकीर्षाजन्यो प्रयत्नः प्रवृत्तिः द्वेषसाधनता
यत्नो ज्ञानजन्योनिवृत्तिः श्वासप्रश्वासहेतुर्यत्नोजीवनयोनिः सचातीन्द्रि
यः बुद्ध्यादयःप्रयत्नाआत्ममात्रसमवेताः तत्रेश्वरगतानित्याः जीव
गताश्चानित्याः आद्यपतनासमवायिकारणंगुरुत्वम् तच्चभूजल राम
२१

ज्ञाते ऽर्थे अस्मात् पुरुषोऽवैति संशयो भवति कस्मात् ज्ञाने परत एव प्रामा।
ण्यं अवधार्य्यते तथाहि अनभ्यासदशापन्नजलादिज्ञाने जाते तत्र प्रा।
माण्यसंशये सत्यपि पुरुषः प्रवर्त्तते ततो जलप्रतिलंभे संजाते मे जल। ति
ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् यत्प्रमा न भवति तत्समर्थप्रवृत्तिज
नकं न भवति यथा जलभ्रमः इति व्यतिरेकिणा अनभ्यासदशापन्नज्ञानप्रा
इति माण्यमवधार्य्यते अभ्यासदशापन्नजलादिज्ञानेषु प्रवृत्तेः पूर्वमपि अ
न्वयिना प्रामाण्यमवधार्य्यते तत्रैव द्वितीयादिजलज्ञानं प्रमा समर्थप्रव
त्तिजनकसजातीयत्वात् आद्यजलज्ञानवत् इति धर्मिप्रमं वस्तु वे अधर्म
प्रमं दुःखम् इच्छात्वसामान्यवती इत्था साधिधा फलविषयिणी तत्सा।

विभागोऽसमवायीकारणम् वेगादलक्षणविभागो निमित्तकारणम् वीची
तरंगन्यायेन कदंवगोलकन्यायेन वा द्वितीयादयः शब्दाः शब्दजाः तत्रो
त्तरशब्दे पूर्वपूर्वशब्दोऽसमवायिकारणम् अनुकूलवातादिनिमित्तका
द्वि रणम् पुनरपि शब्दो द्विविधः वर्णात्मको ध्वन्यात्मकश्च ताल्वादिव्यापारप्रभवो
वर्णात्मकः मृदंगादिप्रभवो ध्वनिः सर्वोपि शब्दः आकाशमात्रसमवेतः
जीवात्मसमवेतबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः शब्दश्च द्वित्वादिवद्व्या
पिनस्तृतीयक्षणे नश्यंति योग्यविभुविशेषगुणानां स्वद्वितीयक्षणोत्पन्न
नाशकत्वनियमात् विहितक्रियासाध्यो धर्मः निषिद्धक्रियासाध्योऽधर्मः
एतौ जीवमात्रसमवेतौ भोगप्रायश्चित्तादिनाश्यौ च संस्कारत्वजातिमान्संस्का
रः स त्रिविधः वेगः स्थितिस्थापको भावना चेति वेगत्वजातिमान्वेगः सर्वमूर्तवृ

च　　　　　　　　　　　　　　　　　　ल
मात्रवृत्तिः आद्यस्पंदनासमवायिकारणं द्रवत्वम् तत् द्विविधम् सांसि
द्धिकं नैमित्तिकं च अग्निसंयोगानपेक्षं द्रवत्वं सांसिद्धिकं तज्जलमात्रवृत्ति
अग्निसंयोगापेक्षं द्रवत्वं नैमित्तिकम् तत् घृतादिकरूपाणां भुवि सुवर्णा
न　दि रूपे तेजसि तत्र अग्निसंयोगाद्द्रवत्वोत्पत्तिः स्नेहत्वजातिमान्
चिक्कणतारूपः स्नेहः स च जलमात्रवृत्ति चणकचूर्णादिपिंडीभावो घृत
तैलादौ स्नेहोपलंभस्तु जलोपाधिकः गुरुत्वद्रवत्वस्नेहाः परमाणुगता
नित्याः कार्यगतास्त्वनित्याः श्रोत्रग्राह्यो गुणः शब्दः स त्रिविधः संयो
जो विभागजः शब्दजश्चेति भेर्य्यामभिहन्यमानायां यः शब्दः स संयोग
जः तत्र भेर्य्याकाशसंयोगोऽसमवायिकारणम् भेरीदंडसंयोगो निमित्तका
रणम् वंशे पाट्यमाने यः चटचटशब्दः स विभागजः तत्र वंशदलाकाश　विभा

त·कौ·
२८

पाधिकदेशवृत्तित्वात् अल्पदेशवृत्ति सामान्यमपरम् यथा द्रव्यत्वगुण
त्वकर्मत्वादि सत्तापेक्षयाल्पदेशवृत्तित्वात् पुनः सामान्यं द्विविधम् जाति
रूपमुपाधिरूपंच साक्षात्संबद्धं सामान्यं जाति यथा सत्ताद्रव्यत्वादि परंपरा
संबद्धं सामान्यमुपाधिः यथा प्रमेयत्वज्ञेयत्वादि दंडत्वकुंडलत्वादि च प्रम
मात्वमेव विषयतासंबंधेन घटादिनिष्ठं प्रमेयत्वादि बोध्यम् इति सा नित्या
मान्यस्य निरूपणम् नित्यद्रव्यवृत्तिर्विशेषो यद्यपि समवायसंबन्धे विशे
षत्वे विभागाभावात्सामान्यलक्षणमेव पूर्वोक्तमेव समवसेवयम् यत्तु वि
शेषानभ्युपगमे समानजातीयजातिगुणक्रियावतां परमाणूनां परस्प णम ाम
रव्यावृत्तिबुद्धिर्न स्यात् तत्रैवापत्तौ योगिनोपितादृशपरमाणूनां ता
२३ २७

द्रव्यमात्रसमवेतः आश्रयपूर्वावस्थापादकः संस्कारः स्थितिस्थापकः सत्का

न कृष्यत रूपादावादौ पुनस्तस्यानास्थितिं जनयति इमौ द्वौ क्रियाजन्यौ स्वजन्य

क्रियानाश्यौ च पूर्वानुभवजन्यस्मृतिहेतुः संस्कारो भावना सजीवमात्र

वृत्तिः त्रिविधः संस्कारो नित्य एव इति गुणनिरूपणम् उर्ध्वदेशसंयोगहे

:कर्म तुरुत्क्षेपणम् अधोदेशसंयोगहेतुः कर्म अपक्षेपणम् स्वसन्निकृष्टसंयो

गहेतुः कर्म आकुञ्चनम् स्वविप्रकृष्टसंयोगहेतुः कर्म प्रसारणम् अन्य

त्सर्वं गमनम् पञ्चविधमपि कर्म मूर्तद्रव्यमात्रसमवेतमनित्यं [illegible] उत्तरसं

योगात् क्व[illegible]चिदाश्रयनाशाद्वा नश्यति इति कर्मनिरूपणम् अधिकदेश म

वृत्तिसामान्यं परं यथा सत्ता द्रव्यत्वादि न्यूनवृत्तित्वेन तत्सामान्यापेक्ष

त॰ को॰ सिद्धः उत्पत्तेरनंतरं समवायिकारणे कार्यस्य संसर्गाभावः प्रध्वंसः सच्छिन्ने कपा
२८ ले घटो भविष्यतीप्रत्ययसिद्धः त्रैकालिकसंसर्गाभावोऽत्यंताभावः सचेह भू
तले घटो नास्तीतिप्रत्ययसिद्धः एवमन्येषामप्येवोत भावः यथायं प्रकारस्या
लोकाभावे यत्रालोको नास्ति तत्रैवांधकारव्यवहारात् लक्षणदोषाणामव्या
प्त्यतिव्याप्त्यसंभवानां तु यथासंभवं हेत्वाभासेष्वंतर्भावः लक्ष्यैकदेशेऽल
क्षणस्यावर्तनमव्याप्तिः यथा पृथिव्या मूलवान्लक्षणं कृष्णरूपस्य संस्थासिन्यव्या
प्तिः तस्य पृथिव्याः सर्वत्राभावात् अलक्ष्येलक्षणगमनमतिव्याप्तिः यथा
मनुष्योर्वा लक्षणं इति लक्षणस्य सकृडेऽतिव्याप्तिः तस्यापि तन्निष्ठत्वात् ल
क्ष्यैकापिलक्षणस्यावर्तमसंभवः यथा घटं दंडवान् ज्ञालक्षणं इति लौक्ष्यास णम
ने
लक्षण २५

नसंकरः स्यादिति एवंयुतसिद्धयोः संयोगइवायुतसिद्धयोः समवायः अवयवः य
योर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ एतौ पंचविधौ अ
वयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति अ
वयव्यादयो हि अविनश्यंतोऽवयवाद्याश्रिता एवावतिष्ठंते अवयवादिनाशानं
तां विनश्यंत गुणगणमात्रं निराश्रिता एवावतिष्ठंते इति विशेषसमवाययोर्नि
रूपणम् तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभावः सच
घटः पटो न स्यादिप्रत्ययसिद्धः. अन्योन्याभावभिन्नोऽभावः संसर्गाभावः स
त्रिविधः प्रागभावः प्रध्वंसाभावोऽत्यंताभावश्चेति उत्पत्तेः प्राकुसमवायिकार
णे कार्यस्य संसर्गाभावः प्रागभावः सच इह कपाले घटो भविष्यतीति प्रत्यय

न· को· खध्वंसस्य मोक्षत्ववारणाय कालीनांतं दुःखध्वंसविशेषणम् अस्मदी
२५ यदुःखप्रागभावसमानकालीनध्वंसकमोक्षेऽव्याप्ति

भवः कस्यापिज्ञानलक्षणस्यखंडादंडाभावात् एतद्दोषरहितंतल्लक्षणम् विशु
द्धमातापितृजन्यत्वाद्ब्राह्मणोइति विशुद्धत्वंषट्कर्मादिकावत्त्वम् इयता
प्रबंधेनसर्वेषांपदार्थानामुद्देशलक्षणेकृतेबालानुपयोगाद्वपरीक्षनकृता (
ता तद्यथैवकेदकमात्रेणलक्षणसंकीर्तनमुद्देशः असाधारणधर्मोलक्षणम्
उद्देशलक्षणयोरुपपत्त्यनुपपत्त्यन्यतरफलकोविचारःपरीक्षा ननुनिः
प्रयोजनमेतत्पदार्थनिरूपणम् तज्जंपदार्थतत्त्वज्ञानस्वरूपंवदुःखोनां न
वतत्साधनेतात्त्वेनप्रयोजनत्वाभावात् इतिचेन्न पदार्थतत्त्वज्ञानस्यात्म
तत्त्वज्ञानद्वारामोक्षसाधनत्वात् आत्यंतिकदुःखध्वंसोमोक्षः स्वस्वसमा
नाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः संसारकालीनदुः

भवः कस्यापि ब्राह्मणस्य संदेहादेरभावात् एतद्दोषरहितं तल्लक्षणम् विप्र
स्य माता पितृजन्यत्वाद्ब्राह्मणोऽपि विप्रत्वं षट्कर्माधिकारवत्त्वम् इत्येता
प्रबंधेन सर्वेषां पदार्थानामुद्देशलक्षणे कृते वालानुपयोगाच्च परीक्षनकृता (
ग लक्ष्यैकदेशमात्रेण लक्ष्यसंकीर्तनमुद्देशः असाधारणधर्मो लक्षणम्
उद्देशलक्षणयोरुपपत्त्यनुपपत्तिमत्ताफलको विचारः परीक्षा ननु निः
प्रयोजनमेतत्पदार्थनिरूपणं तज्जं पदार्थतत्त्वज्ञानस्य पुरुषार्थः स्वाभा न
वतत्साधनत्वेन प्रयोजनत्वाभावात् इति चेन्न पदार्थतत्त्वज्ञानस्यात्म
तत्त्वज्ञानद्वारा मोक्षसाधनत्वात् आत्यंतिकदुःखध्वंसो मोक्षः सकलस्वसमा
नाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः सकलकालीनदुः